06

संस्कृतम्

एकादशीकक्षा

गुणाः – ५०

सार्धहोराद्वयम्

समय :

कृतिपत्रिका

सूचनाः

(१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(२) यथासूचनम् आकलनकृतयः व्याकरणकृतयः च आरेखितव्याः।

(३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

(४) रिक्तस्थानपूरणे युज्यमानाः शब्दाः अधोरेखितव्याः।

प्रथमः विभागः – सुगमसंस्कृतम् । (०६)

प्र.क्र. १ अ) चिन्हानाम् अर्थम् लिखत । (०३)

प्र.क्र १ आ व्यावहारिकशब्दमञ्जूषायाः शब्दान् चित्वा उचित स्तम्भे लिखित (०३)

रुग्णालय :	आभूषणालय :	कोषागार :

(उष्णीषम् , केयूरम् , गणकः, मुक्ताहारः, शाटिका, तापमापिनी, नाणकम् , परिचारिका)

द्वितीय : विभागः – पद्यम् । (०६)

प्र. २ अ १. पद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत । (०४)

अवबोधनम्। (३ तः २) (०२)

१. पूर्णवाक्येन उत्तरं लिखत ।

कामस्य अधिष्ठानानि कानि ?

२. वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत ।

कामः देहिनं न विमोहयति ।

३. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

सर्वशः अङ्गानि संहरते ☐

इन्द्रियनिग्रहः

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ।।६।।
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ।।७।।
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।। ८।।
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ।। ९।।
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता । १०।।

पृथक्करणम् । (०२)

स्तम्भं पूरयत ।

केन आवृतम्	किम् आवृतम्
धूमेन	
मलेन	
उल्बेन	
तेन (कामेन)	

प्र.२ ब पद्यांशस्य अन्वयपूर्तिं कुरुत \ माध्यमभाषया सरलार्थं लिखत । (०२)

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।

सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।।५।।

पुराणम् इति एव न सर्वं साधु, (सर्वं) नवम् इति च अपि न सर्वम् अवद्यं, सन्तः परीक्ष्य अन्यतरत् भजन्ते । (अपि तु) मूढः परप्रत्ययनेयबुद्धिः ।

पुराणम् इति एव न सर्वं ---------, (सर्वं) इति च ---------- न सर्वम् अवद्यम्, सन्तः ---------- अन्यतरत् भजन्ते । (अपि तु) मूढः ----------- ।

तृतीयः विभागः – गद्यम् । (०४)

प्र. 3 गद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत । (०४)

अवबोधनम् (३ तः २) (०२)

१. उचितं वाक्यांशं चित्वा वाक्यानि पुनर्लिखत ।

कार्यं सर्वोत्तमतां याति -----------

अ. रुच्यनुसारम् अर्हतानुसारं च ।

आ. अरुच्यनुसारम् अनर्हतानुसारं च ।

२. पूर्णवाक्येन उत्तरं लिखत ।

सौरभमतेन शिवदासः किं ज्ञातुम् इच्छति ?

३. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

शिवदासेन अनुमतम् ।

किञ्चित् विचिन्त्य शिवदासः प्रतिप्रश्नं कृतवान्–'अस्तु, यदि भवते वृत्तिं दास्यामि तर्हि मम को लाभः ?' सम्भ्रान्तः सौरभः अवदत् 'न अधिगच्छामि भवतः प्रश्नस्य लक्ष्यम् इङ्गितं वा ।' 'अहं ज्ञातुकामोऽस्मि यत् भवान् कस्मिन् विभागे कार्यरतः ? व्यवस्थापनविभागे, विक्रयविभागे, वित्तविभागे अन्यत्र वा ? तत्र कीदृशं कार्यम् अतीवाभिमतं भवत्कृते ?' – शिवदासः अपृच्छत् । सौरभः प्रत्युत्तरं दत्तवान्, ''प्रतिविभागं किञ्चित्कालः मया व्यतीतः। सर्वत्र अहं तथैव दत्तचित्तः। परं मानवसंसाधनविभागे अहमतीव रममाणः आसम् ।'' 'तत् कार्यं भवत्कृते अतीव रुचिकरं वर्तते खलु । परं केन कारणेन ?'– शिवदासः अपृच्छत् ।

सौरभः अकथयत्, 'तत्र मया चरित्रबन्धनस्य तथैव स्वप्रगत्याः अवसरः लब्धः इति अहं मन्ये ।' 'भवतु। भवतु। तत्र कया प्रणाल्या भवता कार्यं कृतम् ?' शिवदासेन पृष्टम् । 'अनेन प्रश्नेन एव तस्मिन् कार्यालये कया प्रणाल्या कार्यं क्रियते एतद् ज्ञातुमिच्छति भवान् इति स्पष्टं भवति । परं तत् तु पण्यस्य गूढरहस्यं गूढमन्त्रः वा । तादृशं रहस्यभेदं प्रतारणां वा अहं न करोमि । परं कया पद्धत्या अहं कार्यं कर्तुमिच्छामि तत् कथयितुं शक्यते', सौरभः अवदत् । 'कथयतु भवान्' शिवदासेन अनुमतम् ।

सौरभः निवेदितवान् - 'प्रथमतः अहम् अतीव निर्बन्धेन सुस्पष्टं करोमि यत् यत्र मत्कृते कार्यसंतोषः तथैव आवश्यकतानुसारेण पर्याप्तं वेतनं स्यात्, कार्यानुकूलं स्वस्थं वातावरणम् अमला स्पर्धा वा स्यात् तर्हि तत्र कदापि कार्यत्यागः मन्मनः न स्पृशेत् । अपरं च मम कार्यपद्धतिः तु एका एव । 'भिन्नरुचिर्हि लोकः' तथैव 'दृष्टं किमपि लोकेऽस्मिन् न निर्दुष्टं न निर्गुणम्' इति मे दृढविश्वासः । अतः रुच्यनुसारम् अर्हतानुसारं च दीयमानं कार्यं सर्वोत्तमतां याति । एषः एव उत्कृष्टतायाः मूलमन्त्रः । परं तदर्थं प्रत्येकं वर्तमानं रुचिभिन्नत्वं योग्यताभिन्नत्वं मयैव अन्वेषणीयम्' ।

शब्दज्ञानम् । (३ तः २) (०२)

१. नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

प्रतिविभागं किञ्चित्कालः <u>मया</u> व्यतीतः । (सौरभ)

२. कथांशतः हेत्वर्थकधातुसाधित-अव्यये लिखत ।

३. विशेषण -विशेष्याणां मेलनं कुरुत ।

अ आ

पर्याप्तम्　　　　वातावरणम्

अमला　　　　वेतनम्

स्पर्धा

पञ्चमः विभागः – भारतीयविद्या

प्र. ५　उचितं विकल्पं चित्वा वाक्यं पूर्णं लिखत । (१० तः ८)　(०८)

1. भारतविद्या नाम .... प्राचीनेतिहास – संस्कृतिविषयिणी ज्ञानशाखा।
   (सिंहलद्वीपस्य, कम्बोजद्वीपस्य, भारतदेशस्य)
2. शक–क्षत्रप–कुशाणादयः ....।
   (राजवंशाः, सङ्घराज्याः, गणराज्याः)
3. सङ्कलनं, सूचीकरणं, वाचनं, मुद्रणं, स्पष्टीकरणं तथैव संरक्षणम् इत्येते विषयाः .... अन्तर्भूताः।
   (मूर्तिशास्त्रे, हस्तलिखितशास्त्रे, स्थापत्यशास्त्रे)
4. डॉ. शोभना गोखले महोदयायाः योगदानं .... महत्त्वपूर्णम्।
   (नाणकशास्त्रे, मूर्तिविज्ञाने, स्थापत्यशास्त्रे)
5. प्राचीनभारतवर्षस्य सर्वेषाम् अङ्गानां सम्यग् अध्ययनं .... समाविष्टम्।
   (मूर्तिविद्यायां, पुराभिलेखविद्यायां, भारतविद्यायां)
6. पुराभिलेखानां .... प्रकाराः सन्ति।
   (दश, त्रयः, पञ्च)
7. .... वाचनार्थं लिपिशास्त्रस्य ज्ञानम् आवश्यकम्।
   (लिपीनां, चित्राणां, मूर्तीनां)
8. अङ्कोर–मन्दिर–समूहः .... देशे वर्तते।
   (कम्बोडिया, बाली, श्रीलंका)
9. 1837 तमे वर्षे .... विशदीकृता।
   (ब्राह्मीलिपी, शारदालिपी, ग्रन्थलिपी)
10. प्राचीनकाले ब्राह्मी, खरोष्ठी, शारदा, ग्रन्थलिपिः इत्यादयः .... प्रचलिताः ।
    (लिपिभेदाः, भाषाभेदाः, लिपिग्रन्थाः)

षष्ठः विभागः – लेखनकौशलम् |(०८)

प्र. ६　अ मञ्जूषातः उचितशब्दान् चित्वा चित्रपटवर्णनस्य　रिक्तस्थानानि पूरयत

(०८)

अवेञ्जर्स एन्फ़िनिटी वार

अस्मिन् चित्रपटे केचन ---------- च बहवः खलपुरुषाः च | खलेषु प्रधानः थेनोस् नाम पुरुषः ---------- प्राप्य विश्वं जेतुम् इच्छति | तेन --------- संकटग्रस्ता जायते | आयर्नमन् , थार् , स्पाइरमन ,हल्क - आदयः नैके दिव्यपुरुषाः -------- सिद्धाः | अत्र --------- प्रवर्तमानः साधुखलानां संघर्षः | तेषां व्यक्तिगतजीवने उद्भूताः नैके विस्मयजनकाः प्रसंगाः | तैः धैर्येण कृतः ---------- प्रतीकारः | इत्येतेषाम् एतद् अतीव रंजकं चित्रणं अस्ति | चित्रपटः एषः रोमहर्षकः --------- च अस्ति |

दिव्यपुरुषाणां बाहुल्येन प्रेक्षकाः संभ्रमिताः न भवन्ति इति तु ----------- कौशलम् एव | कथायां प्रत्येकं दिव्यपुरुषस्य कापि विशिष्टा ---------- प्रतीयते | चित्रीकरणे ---------- कुशलः प्रयोगः , आकर्षकाः संवादाः , चित्रपटस्य विषयोचिता शीघ्रा गतिः इत्यादिभिः गुणैः कथायाः अन्तं यावत् औस्तुकं तिष्ठत्येव |

(तन्त्रज्ञानस्य , वसुधा, अन्तरिक्षे, मायारत्नं, वसुधारक्षणाय, भूमिका, मनोहरी, विपदां, पटकथालेखकस्य, दिव्यपुरुषाः)

निमन्त्रणपत्रिका पठित्वा मार्गदर्शकप्रश्नाधारेण वृतान्तलेखनं कुरुत । 08

ग्राहकजागरणदिनम्-२

निमन्त्रणम्

॥ ग्राहकदेवो भव ॥

ग्राहकदिननिमित्तेन

आपणसङ्कुलम्, मुम्बई नगरम् आयोजयति

'ग्राहकजागरणम् ।'

मुख्यातिथिः - श्री. प्रकाश भेण्डे । (अधिकारी-अन्नौषधप्रशासनम्)

अध्यक्ष : - सौ. सगुणा चौगुले (अध्यक्षः- आपणसङ्कुलम्),

स्थलम् - उपासनासभागृहम्, विलेपारले । समयः - सायं. ५.०० तः ७.०० वादने । दि. २४ डिसेम्बरः २०--

विशेषः- दुर्मिश्रणसंज्ञानप्रात्यक्षिकम् ।

सर्वेषां सहर्षं स्वागतम् ।

संयोजकाः

श्री. संदीपः गोळे	**सौ. रूपा स्वामी**	**श्री. रूपेशः जडे**
विभागप्रमुखः	कार्यक्रम-अधिकारी	प्रमुखसंयोजकः
९५××××××७५	९४××××××१०	८८××××××१५

सप्तमः विभागः - भाषाभ्यासः (०८)

प्र. ७ अधोनिर्दिष्टाः कृतीः कुरुत । (५ तः ४)

अ. नाम-तालिकां पूरयत । (३ तः २) (०२)

नाम	प्रातिपदिम्	अन्तम्	लिङ्गम्	विभक्तिः	वचनम्
मनसा	मनस्	-------------	-------------	तृतीया	द्विवचनम्
मुक्ताफलैः	मुक्ताफलम्	अकारान्त	नपुंसकलिङगम्	---------	-------------
कार्यालये	------------	-----------	नपुंसकलिङगम्	सप्तमी	एकवचनम्

आ. समास -तालिकां पूरयत । (३ तः २) (०२)

क्र.	समस्तपदम्	समासविग्रहः	समासनाम
१	------------------------	योगे तिष्ठति इति	उपपद तत्पुरुषः
२	अपर्याप्तम्	-----------------------	नञ् तत्पुरुषः
३	षट्पदः	षट् पदाः यस्य सः	--------------------

इ. तद्धित – कृदन्ततानां तलिकां पूरयत । (६ तः ४) (०२)

तद्धितम्	कृदन्तम्

(शैर्य्यम्, पत्रकारिता, संयम्य, कौन्तेयः, त्यक्त्वा, ज्ञातुम्)

ई. समानर्थकशब्दं लिखत । (६ तः ४) (०२)

अर्हता, कूर्मः, मनः, गर्दभः, वपुः, धीः

उ .सूचनानुसारं परिवर्तनं कुरुत । (३ तः २) (०२)

१. मनुजः अपकारान् विस्मरेत् । (वाक्यं लोट् लकारे परिवर्तय ।)

२. त्वं सङ्गं त्यक्त्वा कर्माणि कुरु । (पूर्वकालवाचकं योजयत ।)

३. शिवदासः प्रतिप्रश्नं कृतवान् । (वाच्यपरिवर्तनं कुरुत ।)

अष्टमः विभागः – अपठितम् । (०२)

प्र. ८ संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरुत । (३ तः २)

१. शरीरस्य स्वास्थाय सन्तुलितभोजनं अनिवार्यम् ।

२. प्रातः सपाद दशवादने श्लोकप्रतियोगितायाः उद्घाटनम् अस्ति ।

३. उद्यमसमः बन्धुः नास्ति ।

शुभं भवतु